International Journal of Sanskrit Research 2021; 7(5): 278-280

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(5): 278-280
© 2021 IJSR
www.anantaajournal.com
Received: 22-07-2021
Accepted: 26-08-2021

**Dr. G Sireesha**
Associate Professor, Department of Sanskrit, Sri Venkateswara University, Tirupati, Andhra Pradesh, India

**Corresponding Author:**
**Dr. G Sireesha**
Associate Professor, Department of Sanskrit, Sri Venkateswara University, Tirupati, Andhra Pradesh, India

# नवरसानां पुरुषार्थैः सह सम्बन्धः

**Dr. G Sireesha**

**प्रस्तावना**

उपदेशजननमपि रसात्मकस्य नाट्यस्य एकं प्रयोजनम्। उपदेशजनकत्वं च प्रायेण पुरुषार्थमुपादकत्वम् एव। धर्मार्थकाममोक्षाः च चत्वारः पुरुषार्थाः। शृङ्गार, हास्य, करुण, रौद्र, भयानक, बीभत्स, अद्भुत, वीर, शान्तः च नवरसाः। एते नवरसाः पुरुषार्थैः सह सम्बन्धनिरूपणमत्राशयः।

तत्र निरतिशयसुखास्पदतया मोक्षस्य ऐहिकामुष्मिकश्रेयोदायकधर्मस्य च प्राधान्यं अस्ति। अर्थकामयोः धर्मानुबन्धिनोरुपादेयता। धर्माननुबन्धिनोः अर्थकामयोः उपादेयता नास्ति। एते च पुरुषैः प्राधान्येन अर्थमानाः सन्तः पुरुषार्थाः उच्यन्ते। तत्र केषाञ्चित् रसानां एभिः साक्षात् सम्बन्धः वर्तते। अन्येषां च परम्परया। तत्र ये साक्षात् पुरुषार्थसम्बद्धाः ते प्रधानाः। एतदेव उक्तं अभिनवगुप्तेन –

"तत्र पुरुषार्थनिष्ठाः केचित्स्थायिन इति एव प्राधानम् इति।"[1] - एकैकरसं स्वीकृत्य पुरुषार्थेन सम्बन्धः अत्र विचार्यते।

**शृङ्गाररसस्य पुरुषार्थैः सह सम्बन्धः –**

रतिस्थायिकस्य शृङ्गारस्य साक्षात् कामपुरुषार्थेन सह सम्बन्धः अस्ति। तदुक्तमभिनवगुप्तेन –

"तत्र कामस्य सकलजातिसुलभतया अत्यन्तपरिचितत्वेन सर्वान् प्रति हृद्यत इति पूर्वं शृङ्गारः, तदनुगामी च हास्यः च कामप्रधानौ।"[2]

"तत्र कामस्य फलत्वादशेषहृदय संवादित्वाच्च तत्प्रधानं शृङ्गारं लक्षयति"[3] – इति शृङ्गारस्य कामप्राधान्येऽपि तदनुषङ्गि – धर्मार्थ – निष्ठत्वमपि वर्तते। अत एव धर्मशृङ्गारः, अर्थशृङ्गारः, कामशृङ्गारः इति शृङ्गारस्य त्रैविध्यं भरतेन प्रतिपादितम् भावप्रकाशनकारः शारदातनयः उक्तं एवं –

> शृङ्गारो धर्मकामारथभेदेन त्रिविधो भवेत्
> व्रतनियमतपोयोगाद्यस्मिन् बहुधा निवेशितः कामः
> पुत्रादि भोगसुखकृत्सज्ञेयोभोग शृङ्गारः।।

[1]. अभि.भा. पृ - 663

[2]. अभि.भा. पृ - 613

[3]. अभि.भा – पृ.704

शृङ्गारो धर्मकामारथभेदेन त्रिविधो भवेत्
व्रतनियमतपोयोगाद्यस्मिन् बहुधा निवेशितः कामः
पुत्रादि भोगसुखकृत्सज्ञेयोभोग शृङ्गारः।।
अर्थापत्तिर्यस्मिन् कामेन निवेशितेन सम्भवति
तदधीन विभवयोगात् स्वादसुखेनार्थशृङ्गारः।।
परदार-द्यूत-सुरा मृगयाद्यास्वादकेलि विनिविष्टः
तदद्विषयास्वादसुखललितः कामशृङ्गारः।[4]
तदेवं शृङ्गारस्य धर्मार्थकामसम्बन्धित्वात् प्राधान्यम्।

हास्यरसस्य पुरुषार्थैः सह सम्बन्धः –
विनोदात्मकहासस्थायिकस्य हास्यस्य प्रहसनवर्जं नाटकादिष्वङ्गित्वं नैव दृश्यते। प्रहसने अपि अङ्गित्वं अस्य रञ्जकता न तु पुरुषार्थसम्बन्धात्। न हि हास्येन विनोदमात्रपर्यवसितेन कस्यचिद् व्युत्पत्तिः कर्तुं शक्या। प्रायेणान्याङ्गतया निबध्यमानः पुरुषार्थसम्बन्धं आप्नोति। विचार्यमाणे करुण – रौद्र – वीर – भयानक – बीभत्स - शान्तेषु अङ्गत्वं न सुघटम्। तेषां हासविरुद्धचित्तवृत्ति परिपोषात्मकत्वात्। अतश्चायं प्रायशः शृङ्गाराङ्गं भवति। अत एव अस्य परम्परया कामसम्बन्धित्वम्।

रौद्ररसस्य पुरुषार्थैः सह सम्बन्धः -
रक्षोदानवाद्युद्धतप्रकृतिनिष्ठक्रोधस्यायिको रौद्रः प्रायशः अर्थकामाभ्यां साक्षात् सम्बन्धो दृश्यते। उद्धत – प्रकृत्याश्रयौ अर्थकामौ प्रायशः धर्मानुबन्धं सूचयति, तथापि रौद्ररसप्रधानेषु रूपकेषु अर्थकामावपि क्वचिदन्वयमुखेन, क्वचिद् व्यतिरेकमुखेन च सामाजिकान् व्युत्पादयतः। ततश्च धर्मानुबन्धिनावेवार्थकामौ सेव्यौ न तदननुबन्धिनौ। इत्युपदेशस्य प्रदानेन रौद्रोऽपि रसः रसेषु चतुर्थस्थानं आक्रामन् प्रधानेषु परिगण्यते।

वीररसस्य पुरुषार्थैः सह सम्बन्धः –
उत्तमप्रकृतिकोत्साहस्थायिकस्य वीरस्य धर्मपुरुषार्थेन साक्षत् सम्बन्धः अस्ति। वीरस्य प्रभेदेषु दान-दया-युद्धधर्मादिषु धर्मानुबन्धस्य नियमेन परिदृश्य-मानत्वात्। कर्ण, जीमूतवाहन, धर्मराज, अर्जुनादीनां चरितं लोकातिशायिकार्यपूर्णं सत् तत्तादात्म्यापन्नान् सामाजिकान् तत्तदुत्तमकार्यप्रवृत्याभिमुखीकरणेन धर्ममार्ग-गामिनः करोति। वीरस्य ये विभावाः असम्मोह, अध्यवसाय, नय, विनय, बल, पराक्रम, शक्ति, प्रताप, प्रभावादयः ते उत्कर्षकारिणः सन्तः सर्वान् सामाजिकान् तत्तद्विषयेषु व्युत्पन्नान् कुर्वन्ति। अस्य च वीरस्य धर्मानुबन्धिभ्यां अर्थकामाभ्यां आनुषङ्गिकसम्बन्धः वर्तेत।

वाल्मीकिना उक्तं –

"धर्मार्थकामाः खलु जीवलोके समीक्षिता धर्मफलोदयेषु"[5] इति।
"शृङ्गाराद्धि भवेद्धास्यः"[6]
"शृङ्गारानुकृतिर्यातु स हास्यः परिक्रीर्तितः"[7]

इति भरतेनापि, हास्यस्य शृङ्गाराङ्गत्वं सूचितम्। परं प्राचीनानि कानिचित् प्रहसनानि, आधुनिकानि बहूनि च। सङ्घसंस्करणे पुरुषार्थव्युत्पादने च प्रभावोत्पादकानि दृश्यन्ते।

करुणरसस्य पुरुषार्थैः सह सम्बन्धः –
इष्टजनवियोगादिभिः जायमानस्य दुःखप्रदशोकस्थायिकस्य करुणस्य शौकमात्रपर्यवसायित्वे धर्मार्थकाममोक्षेषु न कस्यचित् व्युत्पत्तिः तेन कर्तुं शक्या। किन्तु शोकस्य दुःखप्रदत्वेन, तादृश दुःखबाहुल्यसहनं लोकोत्तरकार्यनिर्वर्तन प्रवृत्तस्य रामादेः स्थैर्यद्योतय, तेषां लोकोत्तरं उत्साहं अभिव्यञ्जयत् परम्परया धर्मेण पुरुषार्थेन करुणस्य सम्बन्धं उपकल्पयति। पितुराज्ञापालनाय अरण्य गमनं, सीतावियोगः, लोकरञ्जनाय सीतायां परित्यजनं इत्यादि सर्वमपि धर्मवीरं पोषयति। अत एव रामायणे तन्मूलकेषु नाटकेषु च धर्मवीरस्यैव रामस्य प्राधान्यं कुरुणस्य अङ्गत्वं च दृश्यते। करुणस्य वीररसाङ्गतया धर्मपुरुषार्थसम्बन्धित्वं अस्ति। उत्तररामचरिते –
"एवमेते हृदयमर्मच्छिदः संसारभागाः येभ्यो बीभत्समानाः सर्वान् कामान् परित्यज्य अरण्ये मनीषिणो विश्राम्यन्ति।"[8]
इति रामस्य वचनं करुणस्य मोक्षेण परम्परा सम्बन्धं दर्शयति। करुणस्य साक्षात् पुरुषार्थसम्बन्धो नास्ति, तथापि धर्ममोक्षाभ्यां परम्परा सम्बन्धमस्ति।

भयानकरसस्य पुरुषार्थैः सह सम्बन्धः –
अवरात्मकभयस्थायिकस्य भयानकस्य साक्षात् पुरुषार्थसम्बन्धो नास्ति। अत एवास्य न कस्मिंचिदपि रूपकेऽङ्गित्वं दृश्यते। परं अन्यरसाङ्गता निसर्गतः सिद्धा। तथाहि प्रतिनायकाश्रयतया वर्ण्यमानो भयानकः वीररौद्रयोः पोषको दृश्यते। रावणकृत कैलासपर्वतचालनचकितायाः पार्वत्याः भयं, शिवस्य स्वयङ्ग्रहाश्लेषसुखजनकतयोपवर्णितं सत् शृङ्गाराङ्गं भवति। एवं अन्यस्य रसाङ्गतया परम्परा पुरुषार्थसम्बन्धः अस्ति।
बीभत्सरसस्य पुरुषार्थैः सह सम्बन्धः -
जुगुप्सा स्थायिभावात्मकस्य बीभत्सस्यापि साक्षात् पुरुषार्थोपगित्वं न दृश्यते। परमस्य शान्तस्य अङ्गत्वं स्वभावसिद्धं, संसारजुगुप्सायाः तत्वज्ञानशाश्वतानन्दाद्युपायतया

4. भा.प्र. – पृ.247

5. रामायणम् – पृ. 142

6. ना.शा. पृ. 676

7. ना.शा. पृ. 677

8. उ.रा.च – पृ.20

प्रसिद्धत्वात्। शङ्गारहास्याद्भुतवर्जं अन्येष्वपि रसेष्वस्याङ्गत्वं सम्भवतीति परम्परया पुरुषार्थसाधकत्वं अस्यामपि अस्ति।

अद्भुतरसस्य पुरुषार्थैः सह सम्बन्धः –
हृदयोल्लासक्षेपकविस्मयस्थायिकोऽपि अद्भुतरसः रञ्जनप्रधानोऽपि साक्षात् पुरुषार्थसम्बन्धं नानुभवति। परं प्रायेण शृङ्गारादि सर्वरसाङ्गत्वं अस्योपपद्यते। सर्वत्रापि अतिशयस्य निरूपणे तत्तद्रसपोषकतायाः सम्भवात्। अत एव नाटकादिषु निर्वहणसन्धौ अद्भुतस्य पोषणं भरतेनोपदिष्टम्। ततश्चास्य परम्परया पुरुषार्थसम्बन्धोऽस्ति।

शान्तरसस्य पुरुषार्थैः सह सम्बन्धः –
शान्तो नाम शमस्थायिभावात्मको मोक्षप्रवर्तकः। स तु तत्वज्ञानवैराग्याशय-शुद्ध्यादिभिः विभावैरुत्पद्यते इति भरतः। मोक्षस्य निरतिशयसुखास्पदम्। अतश्च पुरुषार्थेषु सर्वेषु अस्य उत्तमोत्तमत्वम्। अत एव च शास्त्रस्मृतीतिहासादयो मोक्षमार्गप्रदर्शकाः दृश्यन्ते। ततश्च मोक्षरूपस्योत्तमपुरुषार्थस्य व्युत्पाद-कत्वाच्छान्तः रसेषु प्रथमस्थानं आक्रामति।
तस्मात् शान्त – वीर – शृङ्गार – रौद्राणां – साक्षात् पुरुषार्थैः धर्मार्थकाममोक्षैः यथायोगं सम्बन्धः अस्तीतित्येषां प्राधान्यम्। सकलजनाह्लादकत्वाद् व्यापकत्वाच्च एषामेव प्राधान्यम्। कार्यवशादेषां परस्परं अङ्गभावे सत्यपि, स निसर्गतः सिद्धं एवं प्राधान्यं न विनाशयति।

उपसंहारः -
शान्त, वीर, शृङ्गार – रौद्राः साक्षात् पुरुषार्थसम्बन्धत्वात् प्रधानाः। हास्यादयस्तु साक्षात् पुमर्थोपयोगित्वाभावात् अप्रधानाः इति निष्कर्षः। अभिनवगुप्तस्यापि अयमेवाशयः – तत्र पुरषार्थनिष्ठाः केचित्स्थायिन इति एव प्रधानम्। तद्यथा रतिः काम तदनुषङ्गि धर्मार्थनिष्ठा। क्रोधस्तत्प्रधानेष्वर्थ-निष्ठः। अर्थकामपर्यवसितोऽप्युत्साहः समस्त – धर्मादिपर्यवसितः। तत्वज्ञानजनितनिर्वेदः पुष्टो विभावादिभिः मोक्षोपाय इति तावदेषां प्राधान्यम्।

आधारग्रन्थसूची -

1. अभिनवभारती – अभिनवगुप्तः – हिन्दूविश्वविद्यालयः वारणासी – 1971.
2. नाट्यशास्त्रम् – भरतमुनिः – हिन्दूविश्वविद्यालयः वारणासी – 1975.
3. भावप्रकाशनम् – शारदातनयः – Oriental Series -1968.
4. उत्तररामचरितम् – भवभूतिः – वाविल्ल रामस्वामिशास्त्रि मद्रास् – 1959.


सङ्केतसूची -
1. अभि.भा – अभिनवभारती
2. भा.प्र – भावप्रकाशनम्
3. ना.शा – नाट्यशास्त्रम्
4. उ.रा.च – उत्तररामचरितम्